संस्कृत-वार्ता:

16.03.2024

सायम् - 06:20

<u>मुख्यवार्ता:</u>

- निर्वाचन–आयोगेन लोकसभा–निर्वाचनार्थ तिथय: उद्घोषिता:। अप्रैलमासस्य नवदश-दिनांकत: मतदानं मतगणना च जूनमासस्य चतुर्थे दिनांके भविष्यति।
- केन्द्रेण जम्मू-कश्मीर-पीपुल्स-फ्रीडम-लीग इत्यस्य पञ्चवर्षाणि यावत् प्रतिबन्ध: कृत: अपिच जे.के.एल्.एफ्. इत्यस्य यासिन-मलिक-समूहे अपि प्रतिबन्धोऽयं संवर्धित:।
- भारत-ऋतु-विज्ञानविभागेन जम्मूकश्मीरे अल्पवृष्टि: हिमपातश्च प्रकल्पित:। लद्दाख-हिमाचलप्रदेश-राज्ययो: अस्य मासस्य एकविंश्यां तिथौ तादृशी स्थिति अनुमानिता।
- ऑल-इंग्लैण्ड-ओपन-बैडमिण्टन-चैम्पियनशिप-प्रतिस्पर्धायां भारतीय क्रीडक लक्ष्यसेन: अद्य इण्डोनेशिया-देशीयेन जोनाटन-क्रिस्टीइत्यनेन सह पुरूषाणां एकलीय-उपान्त्यचक्रे क्रीडिष्यति।

<u>लोकसभा-निर्वाचनं</u>

निर्वाचन–आयोगेन लोकसभा–निर्वाचनार्थं तिथय: उद्घोषिता:। देशे षोडश–लोकसभायै सप्त–चरणेषु मतदानं भविष्यति। प्रथमे चरणे अप्रैलमासस्य नवदश दिनांके द्वयोत्तर एकशतं आसनेषु द्वितीय चरणे षड्विंशे दिनांके नवाशीति: आसनेषु तृतीये चरणे मई मासस्य सप्तमे दिने चतुर्णवति: आसनेषु चतुर्थे चरणे मेमासस्य त्रयोदश दिनांके षड्नवति: आसनेषु पञ्चमे चरणे मे-मासस्य विंशे–दिने नवचत्वारिंशत् आसनेषु षष्ठे चरणे मासस्य पञ्चविंशे दिने सप्तपञ्चाशत् आसनेषु अन्तिमे चरणे जून मासस्य प्रथमे दिने सप्तपञ्चाशत् आसनेषु मतदानं भविष्यति । तदनु जून-मासस्य चतुर्थे दिने मतगणना आरप्स्यतो । अद्यारभ्य आचार संहिता प्रारब्धा।

<u>केन्द्रं-अवैध</u>

केन्द्रेण जम्मू-कश्मीर-पीपुल्स-फ्रीडम-लीग इत्यस्य पञ्चवर्षाणि यावत् प्रतिबन्ध: कृत: अपि च जे.के.एल्.एफ्. इत्यस्य यासिन-मलिक-समूहे अपि प्रतिबन्धोऽयं संवर्धित:। एकस्मिन् सामाजिक-सन्देश-पटले केन्द्रीय गृहमंत्री अमितशाह: प्रोदीरितवान् यत् प्रतिबन्धित: अयं समूह: जम्मूकश्मीरे आतंकवादं पृथक्वादं च संवर्धयितुं संलग्नो आसीत्।

## भारतीय-ऋतु विभाग:

भारत-ऋतु-विज्ञानविभागेन जम्मूकश्मीरे अल्पवृष्टि: हिमपातश्च प्रकल्पित:। लद्दाख-हिमाचलप्रदेश-राज्ययो: अस्य मासस्य एकविंश्यां तिथौ तादृशी स्थिति अनुमानिता। विभागेन कथितं यत् पश्चिमबंगाल-झारखण्ड-ओडिशा-विदर्भ-छत्तीसगढ-मध्यप्रदेश-राज्येषु वृष्टि: विद्युत्ध्वनि: वायुप्रवाहश्च च अस्य मासस्य विंशति दिनांकं यावत् अनुमानित: ।

## प्रसार-भारती-अध्यक्ष:

पूर्व–भारतीय–प्रशासनिक-अधिकारी नवनीतकुमार-सहगल: अद्य प्रसारभारत्या: नवीनाध्यक्षत्वेन पदभारं स्वीकृतवान् । श्रीसहगल: यूपी-संवर्गस्य अष्टाशीत्यधिक नवदशतमवर्षस्य सेवानिवृत्त: अधिकारी अस्ति । एष: अधिकारी ए. सूर्य- प्रकाशस्य स्थाने आगत: । यो हि विशंत्यधिक – द्विसहस्रतमे वर्षे अध्यक्षरूपेण स्वीय-कार्यकाल: सम्पूरित: । इत: पूर्वं राष्ट्रपति: द्रौपदी मुर्मु: उपराष्ट्रपते: जगदीपधनखडस्य अध्यक्षतायुताया: प्रसारभारत्या: अध्यक्षाय चयनसमित्या तस्य नाम्न: स्वीकृते: अनन्तरं एष: नियुक्त: जात: ।

## जयशङ्कर – सिंगापुरम्

विदेशमन्त्री डां एस्. जयशंकर: अस्य मासस्य त्रयोविंशतिदिनांकत: सिंगापुर–फिलीपींस–मलेशियादेशानां पञ्चदिवसीययात्रायां भविष्यति । यात्रा इयं त्रिभि: देशै: सह द्विपक्षीय–सम्बन्धान् विधातुं ध्यानं प्रदास्यति तच्च पारस्परिक–क्षेत्रीय–विषयेषु वार्ताया: कृते अवसरप्रदानं करिष्यति ।

## केजरीवाल – विमोनम्

दिल्ल्या: राउज–एवेन्यू–न्यायालयेन अद्य दिल्ल्या: मुख्यमन्त्री अरविन्दकेजरीवाल: सुप्रसिद्धेन उत्पादन-शुल्क-नीति-प्रकरणेन सम्बद्धेन एकस्मिन् प्रसंगे प्रवर्तननिदेशालयेन प्रसारितस्य आह्वानस्य अन्तर्गतं निगडनं विरूद्धय विमोचित: । न्यायालयेन अत्रावसरे प्रख्यापितं यत् आम-आदमी-पार्टीतिदलस्य नेतु: एतस्य विमोचनाय पञ्चदश-सहस्रं-रूप्यकाणां निम्न देयराशे: एकलक्षरूप्यकाणां च सुरक्षा-बन्धं प्रख्यापयितुं निर्दिष्टवान् । दिल्ल्या: मुख्यमन्त्रिणा भारतीय-दण्ड-संहिताया: धाराया: चतु: सप्तत्यधिकैकशतं इत्यस्या: उल्लघनं कृतमस्ति । श्री केजरीवाल: प्रवर्तन निदेशालयस्य मुहुर्मुहु: समाह्वनानां पश्चादेव नियमस्य अनुपालनं न करोति । तेन अष्टवारस्य निदेशालयस्य संचेतनाअपि दूरीकृतास्ति । प्रकरणस्य अस्य अग्रिमं वादश्रवणं अप्रैलमासस्य प्रथमे दिनांके प्रात: दशवादने भविष्यति ।

## जम्मूकश्मीर – पण्डिता:

जम्मूकश्मीरराज्ये विस्थापितानां कश्मीर-पण्डित-संघटनानां अनेकै: प्रतिनिधिभि: ह्य: उपराज्यपालेन मनोज-सिन्हा इत्यनेन सह मेलनं विहितम् । प्रतिनिधिभि: स्वकीय:समुदायस्य कल्याणाय अनेकेषां विषयाणां सूचना उपराज्यपालाय प्रदत्ता । प्रतिनिधिय: उपराज्यपालाय अनेकानि पुस्तकानि अपि प्रदत्तवन्त:। प्रदत्त-पुस्तकेषु जोनाराजा–नरसंहार–अत्याचार–अध्ययन– संस्थानयो: पत्रिका पावक: इत्थं डॉ. आर. एल्. भट्टस्य पुस्तकं 'कश्मीर आफ्टर कल्हण' इति समाविष्टमस्ति । कश्मीरी-पण्डित-समुदायस्य युवकेषु क्रीडां संवर्धमितुं ललितादित्य-खेल-संघटनस्य सदस्यै: श्री सिन्हां प्रति आभार: प्रकटित: ।

## नासा - यूरोप – मिशन

नासा–इति–अंतरिक्ष–अनुंसन्धान–संस्थानं अस्मिन् वर्षे आक्टोबर–मासे बृहस्पति–चंद्र्यो: यूरोपा–इति अंतरिक्ष अभियानस्य माध्यमे एकं संदेशं नेष्यति । एतत् अभियानं जीवनस्थ संभावनांज्ञातुम् विधास्यते । यतोऽदि वैज्ञानिकै: यूरोपा–इत्यस्य अधस्तात् लावणिक–निर्झर्या: भविष्यवाणी कृताऽस्ति । यूरोपा–इति एतत् अन्तरिक्ष्यानं अमेरीकाया: एड़ा–लिमोन–इति अनेन लिखितस्म धातुपत्रं अस्ति । एतदर्थं जनै: द्विदशमलवाधिक–षट्–कोटि –मितानि नामानि प्रस्तुतानि आसन् । एतेषु भारतीय–सम्बद्धा: अपि सन्ति। अवधेयं अस्ति यत् एतेषु हिन्दी–समेत्य–अन्यासु भाषासु अपि ध्वनितरंगा: सन्ति । अवधेयं अस्ति यत् नासा इति अमरीकीय अन्तरिक्षा भियानेन एतदर्थं जनेभ्य: सन्देशा: अभियाचिता: सन्ति।

## इज़रायल

इज़रायल–देशस्य प्रधानमंत्रिणा बेंजामिन-नेत्यानाहू इत्यनेन गाजा इत्यस्य निकषा दक्षिण-दिशि राफा–क्षेत्रे आक्रमणस्य अनुमति: प्रदत्ताऽस्ति । नेत्यानाहू इत्यनेन युद्ध-विरामाय हमास-इत्यस्थ नूतन प्रस्तावस्य ऽपरि चर्चायै इज़रायल देशस्य मंत्रिमंडलीय उपवेशनस्य अनन्तरं एतत् निर्णयं स्वीकृतम् । प्रथमे चरणे हमास–इत्यनेन फिलस्तीन–बंन्धकानां मुक्ते: स्थाने इज़रायल महिला: बालान् वृद्धान् रूग्णजनानां च मुक्ते: प्रस्ताव: प्रदत्त: । यस्मिन् इज़रायल-जनानां हत्याया: दोषिण: अपि सन्ति । अवधेयं अस्ति इज़रायल प्रधानमंत्री बंधकानां मोचनाय संवादं विधातुं कतर-देशे एकं प्रतिनिधिमण्डलं प्रेषयिष्यति । येन युद्ध विरामस्य आशा संवर्धिष्यति । अवधेयं अस्ति यत् इत: पूर्वं अपि नवम्बर मासे साप्ताहिक संघर्ष–विरामस्य अवधौ बंधका: मोचिता: आसन् । इज़रायल देशेन अनुमीयते यत् गाजायां इदानीं अपि त्रिंशदुत्तरएक शतं बंधका: विद्यन्ते । एतेषु द्वात्रिंशत् मृता: ।

__क्रिकेट्__

महिला–प्रीमियर–लीग– क्रिकेट् स्पर्धा – मालिकायां रोएल – चैलेन्जर्स बैंगलोर–दलेन मुंबई–इंडियन–दलं पराजित्य निर्णायक–चक्रे प्रवेश: कृत: । गतरात्रौ क्रीडितायां स्पर्धायां बैंगलोर–दलं–मुंबई दलं पञ्च–धावनांकै: पराजितं । निर्णायक चक्रे श्व: दिल्ली–बैंगलोर–दलयो: मध्ये स्पर्धा भविष्यति । इयं स्पर्धा दिल्लीस्थे अरूणजेटली क्रीडांगणे भविष्यति ।

__बैडमिण्टन__

ऑल-इंग्लैण्ड-ओपन-बैडमिण्टन-चैम्पियनशिप-प्रतिस्पर्धायां भारतीय क्रीडक: लक्ष्यसेन: अद्य सायं विश्वस्य शीर्षेण इण्डोनेशिया देशीयेन जोनाटन-क्रिस्टीइत्यनेन सह पुरूषाणां एकलीय-उपानयचक्रे बर्मिंघम स्थले क्रीडिष्यति।

।। इति वार्ता: ।।